१५

॥अग्निसूक्तम्॥

प्रस्तावना

वेदोऽखिलधर्ममूलम्। सर्वेषां धर्माणां वेदः एव मूलम्। जगति चत्वारः वेदाः सन्ति। ते वै ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। तेषु चतुर्षु वेदेषु ऋग्वेदः प्राचीनतमः अस्ति। ऋग्वेदस्य प्रथमं सूक्तम् अग्निसूक्तम्। जगति उपलभ्यमानस्य साहित्यस्य इदम् प्राचीनतमं सूक्तम्। अत्र अग्नेः स्तुतिः विद्यते। वेदे अग्निः बहुप्रसिद्धः देवता अस्ति। ऋग्वेदे प्रायः २०० सूक्तेषु अग्नेः स्तुतिः समुपलभ्यते। ऋग्वेदस्य प्रथमं पदमपि 'अग्निम्' इति अस्ति। अस्मिन् पाठे अग्निसूक्तस्य नव मन्त्राः सन्ति। तत्र च सायणाचार्यः भाष्यं रचितवान्। अस्मिन् पाठे तस्यैव भाष्याम् अनसृत्य व्याख्यानं प्रदत्तम् अस्ति। अस्य अग्निसूक्तस्य मधुच्छन्दा ऋषिः, गायत्री छन्दः, अग्निश्च देवता। अग्निशब्दस्य अर्थः भवति- यः देवः यज्ञे प्रदत्तं हविः देवतानां कृते आदाय गच्छति सः अग्निः। ऋग्वेदे त्रिषु प्रमुख्यदेवेषु अग्नेः स्थानं द्वितीयम्। अग्निः मानवजीवनेन सह दृढतया सम्बद्धः अस्ति। सम्पूर्णगृहकार्याय अग्नेः महती आवश्यकता अस्ति। प्रतिगृहम् अस्य निवासः। अग्निः हि एवं देवः यः जन्मनः आरभ्य मृत्युपर्यन्तं जनेन सहैव तिष्ठति। अग्निना एव सम्पूर्णसंसारस्य प्रकाशः जातः। अग्निः एव प्राचीनानाम् ऋषीणां प्रधानम् आसीत्। यतो हि अग्निना एव यज्ञः भोजनादिकं शीतनिवारणं च सम्पाद्यन्ते स्म।

अस्मिन् पाठे क्वचित् अन्येषाम् आचार्याणाम् मतस्यापि संग्रहः कृतोऽस्ति। टिप्पणीरूपेण तस्य प्रकटनं कृतमस्ति। टिप्पण्याम् सूक्तस्य अवबोधाय उपयोगी विषयः प्रदत्तोऽस्ति। टिप्पणीस्थं मतम् अधिकजिज्ञासूनां कृते विशेषतः प्रदत्तमस्ति।

उद्देश्यानि

एतं पाठं पठित्वा भवान् –

- सूक्तस्थानां मन्त्राणां संहितापाठं ज्ञास्यति।
- सूक्ते विद्यमानानां मन्त्राणां पदपाठं ज्ञास्यति।
- सूक्तस्थानां मन्त्राणाम् अन्वयं कर्तुं समर्थो भवेत्।
- सूक्तस्थानां मन्त्राणां व्याख्यानं कर्तुं समर्थो भवेत्।
- सूक्ते विद्यमानानां मन्त्राणां सरलार्थं ज्ञास्यति।
- मन्त्रे स्थितं व्याकरणं ज्ञातुं समर्थो भवेत्।

➤ वैदिकशब्दान् ज्ञातुं शक्नुयात्।
➤ वैदिकलौकिकयोः भेदं ज्ञातुं शक्नुयात्।
➤ सूक्तार्थं ज्ञात्वा सूक्तमहिमानम् ज्ञास्यति।
➤ केषाञ्चित् वैदिकरूपाणि ज्ञास्यति।
➤ सूक्ततात्पर्यं सूक्ततत्त्वं च अवगच्छेत्।
➤ अग्निसूक्ते अग्नेः वर्णनम् यथास्ति तथा ज्ञास्यति।
➤ अग्निः किं किं करोति इत्यपि अवगच्छेत्।
➤ कीदृशः अग्निः स्तुत्यः भवति इत्यपि ज्ञास्यति।

अग्निसूक्तम्

१५.१) मूलपाठः – अग्निसूक्तम् (ऋग्वेदीयम् १.१)

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥१॥

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवाँ एह वक्षति॥२॥

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे।
यशसं वीरवत्तमम्॥३॥

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि।
स इद्देवेषु गच्छति॥४॥

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागमत्॥५॥

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि।
तवेत्तत्सत्यमङ्गिरः॥६॥

उप॑ त्वाग्ने दि॒वेदि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम्।
नमो॒ भर॑न्त॒ एम॑सि॥७॥

राज॑न्तमध्व॒राणां॑ गो॒पामृ॒तस्य॒ दीदि॑विम्।
वर्ध॑मानं॒ स्वे दमे॑॥८॥

स नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सूपाय॒नो भ॑व।
सच॑स्वा नः स्व॒स्तये॑॥९॥

१५.१.१) इदानीं मूलपाठम् अवगच्छाम

अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्।
हो॒तारं॑ रत्न॒धात॑मम्॥१॥

पदपाठः - अ॒ग्निम्। ई॒ळे॒। पु॒रःऽहि॑तम्। य॒ज्ञस्य॑। दे॒वम्। ऋ॒त्विज॑म्। होता॑रम्।
रत्न॒ऽधात॑मम्॥१॥

अन्वयः- यज्ञस्य पुरोहितं देवं होतारम् ऋत्विजं रत्नधातमम् अग्निम् ईळे।

व्याख्या- अग्निनामकं देवम् ईळे स्तौमि। 'ईड् स्तुतौ' इति धातुः। डकारस्य ळकारो बह्वृचाध्येतृसम्प्रदायप्राप्तः। तथा च पठ्यते- 'अज्मध्यस्थडकारस्य ळकारं बह्वृचा जगुः। अज्मध्यस्थढकारस्य ळ्हकारं वै यथाक्रमम्' इति। मन्त्रस्य होत्रा प्रयोज्यत्वात् अहं होता स्तौमीति लभ्यते। कीदृशमग्निम्? यज्ञस्य पुरोहितम्। यथा राज्ञः पुरोहितः तदभीष्टं सम्पादयति, तथा अग्निरपि यज्ञस्य अपेक्षितं होमं सम्पादयति। यद्वा, यज्ञस्य सम्बन्धिनि पूर्वभागे आवहनीयरूपेण अवस्थितम् पुनः कीदृशम्? होतारम् ऋत्विजम्। देवानां यज्ञेषु होतृनामक ऋत्विग् अग्निरेव। तथा च श्रूयते- 'अग्निर्वै देवानां होता' (ऐ० ब्रा० ३. १४) इति। पुनरपि कीदृशम्? रत्नधातमं यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा।

टिप्पणी - अग्मिमीळे अग्निम् याचामि। यज्ञस्य देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा। तेन यज्ञस्य दाता दीपयिता द्योतयिता अयम् अग्निः इति उक्तं भवति। कथं द्युस्थानः - यद्यपि अग्निः पृथिवीस्थानः तथापि देवान् प्रति हविवहनाद् द्युस्थानो भवति। यो देवः सा देवता। अर्थाद् देवः एव देवता। होतारम् ह्वातारम्। रत्नधातमम् रमणीयानां धनानां दातृतमम्। (स्कन्दस्वामी) - शान्तिकपौष्टिकैः कर्मभिः यो राजानम् आपद्भ्यः त्रायते स पुरोहितः इत्युच्यते। यज्ञस्य आपदाम् हन्तारम्

इत्यर्थः। पूर्वस्यां दिशि निहितः आहवनीयात्मना स्थापितः पुरोहितः इत्यपि अर्थः। रत्नम् धनस्य नाम अस्ति। धनानाम् अतिशयेन दाता अग्निः। तम् स्तौमि।

सरलार्थः- यज्ञस्य प्रकाशयुक्तः पुरोहितः अग्निः अस्ति। अथवा यजमानस्य सम्मुखे अग्निः स्थितः। स देवान् यज्ञे आह्वयति। सर्वाधिकरत्नानि स धारयति। एवं यः अग्निः तम् अहं स्तौमि।

व्याकरणम् -

यज्ञस्य- यज्-धातोः नङि षष्ठ्येकवचने यज्ञस्य इति रूपम्।

देवम्- दिव्-धातोः अच्प्रत्यये द्वितीयैकवचने देवम् इति रूपम्।

होतारम्- हूधातोः तृन्प्रत्यये द्वितीयैकवचने होतारम् इति रूपम्।

रत्नधातमम्- रत्नानि दधाति इति रत्नधाः, रत्नधाशब्दस्य क्विप्प्रत्यये तमप्प्रत्यये च द्वितीयैकवचने रत्नधातमम् इति रूपम्।

इळे- स्तुत्यर्थकाद् ईड्-धातोः लटि उत्तमपुरुषैकवचने इळे इति रूपम्।

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवाँ एह वक्षति॥२॥

पदपाठः - अग्निः। पूर्वेभिः। ऋषिऽभिः। ईड्यः। नूतनैः। उत। सः। देवान्। आ। इह। वक्षति॥२॥

अन्वयः - अग्निः पूर्वेभिः उत नूतनैः ऋषिभिः ईड्यः सः देवान् इह आ वक्षति।

व्याख्या- अयम् अग्निः पूर्वेभिः पुरातनैः भृगवङ्गिरःप्रभृतिभिः ऋषिभिः ईड्यः स्तुत्यः, नूतनैः उत इदानीन्तनैः अस्माभिरपि स्तुत्यः। सः अग्निः सन् इह यज्ञे देवान् हविर्भुजः आ वक्ष्यति।

टिप्पणी - उतशब्दस्य विकल्पः अर्थः। तथापि अत्र चार्थः अर्थात् समुच्चयः अर्थः निपातनाद्। अतः पूर्वतनैः नूतनैः च इत्यर्थो लभ्यते।। प्रथममन्त्रे उक्तं यद् अहम् अग्निम् स्तौमि। किमत्र स्तुतौ कारणम्। अतः अयं द्वितीयो मन्त्रः। यतो हि अयमग्निः पूर्वतनैः ऋत्विग्भिः स्तुत्यः, नूतनैरपि स्तुत्यः। यावान् कश्चिद् ऋषिः, तेन सर्वेण स्तोतव्यः इति। अयमेव हेतुः यद् अहम् अग्निम् ईडे। इह समग्रे जगति स एव अग्निः देवान् यज्ञेषु आह्वयति, नान्यः कश्चिदपि।

सरलार्थः- अग्निः प्रचीनैः नूतनैश्च ऋषिभिः स्तुत्यः। एवं यः अग्निः स देवान् यज्ञे आह्वयेत्।

व्याकरणम् -

- पूर्वेभिः- पूर्वैः इत्यस्य वैदिकं रूपमिदम्।
- ईड्यः- ईड्-धातोः ण्यत्प्रत्यये प्रथमैकवचने ईड्यः इति रूपम्।

- देवाँ- देवशब्दस्य द्वितीयाबहुवचने रूपमिदम्। पदान्ते स्थितात् नकारात्पूर्वं आकारः किञ्च परं यः कोऽपि स्वरः तिष्ठति चेत् नकारस्य लोपः भवति। अपि तु पूर्ववर्णस्य अनुनासिकादेशः भवति।
- वक्षति- वह्-धातोः लृटि स्यप्रत्यये यकारस्य छन्दसि लोपे वक्षति इति रूपम्। लेट्लकारेऽपि एवं रूपं सम्भवति।

अ॒ग्निना॑ र॒यिम॑श्नव॒त्पोष॑मे॒व दि॒वेदि॑वे।
य॒शसं॑ वी॒रव॑त्तमम्॥३॥

पदपाठः - अ॒ग्निना॑। र॒यिम्। अ॒श्न॒व॒त्। पोष॑म्। ए॒व। दि॒वेऽदि॑वे। य॒शस॑म्। वी॒रव॑त्ऽतमम्॥३॥

अन्वयः - अग्निना दिवेदिवे पोषम् एव यशसं वीरवत्तमं रयिम् अश्नवत्।

व्याख्या- योऽयं होत्रा स्तुत्यः अग्निः। तेन अग्निना निमित्तभूतेन यजमानः रयिं धनम् अश्नवत् प्राप्नोति। कीदृशं रयिम्। दिवेदिवे पोषम् एव प्रतिदिनं पुष्यमाणतया वर्धमानमेव, न तु कदाचिदपि क्षीयमाणम्। यशसं दानादिना यशोयुक्तं वीरवत्तमम् अतिशयेन पुत्रभृत्यादिवीरपुरुषैः उपेतम्। सति हि धने पुरुषाः सम्पद्यन्ते।

टिप्पणी - एवं स्तुतः अग्निः। यः स्तुतिं करोति स स्तोता स्तुतिकारणात् अग्निसकाशात् रयिं धनम् प्राप्नोति। न च केवलं धनम्। किं तर्हि। पोषम् पुष्टिम् अपि। कदा प्रोप्नोति। दिवे दिवे दिने दिने अहनि अहनि। सर्वकालम् इत्यर्थः। किम् अन्यत् प्राप्नोति। यशसम्। अर्थात् यशः कीर्तिम् प्राप्नोति। कीदृशं यशः। यस्मिन् वीराः पुत्राः सन्ति तद् वीरवत्। अतिशयेन वीरवत् वीरवत्तमम्। अर्थात् बहुभिः वीरपुत्रैः सहितं यशः लभते। इत्थम् ईदृशस्य अग्नेः यः स्तुति करोति स स्तुतिफलम् अग्निसकाशात् लभते। फलस्वरूपम् हि - धनम् पुष्टिः विपुरवीरपुत्रसहिता कीर्तिः च।

सरलार्थः- यजमानः अग्निना धनं लभते। तत् धनं प्रतिदिनं वर्धते यजमानश्च धनस्य दानादिकर्मणः कृते व्ययात् यशः कीर्तिम् लभते। तच्च यशः पुत्रादिवीरपुरुषैः सहितं प्राप्नोति। अर्थात् बहवः पुत्राः वीराः स्युः। तेन स्तोतुः कीर्तिः स्याद्।

व्याकरणम् -

- दिवेदिवे- दिवशब्दस्य सप्तम्येकवचने दिवेदिवे इति रूपम्।
- पोषम्- पुष्-धातोः घञ्प्रत्यये द्वितीयैकवचने पोषम् इति रूपम्।
- यशसम्- यशश्शब्दस्य अच्प्रत्यये द्वितीयैकवचने यशसम् इति रूपम्। लोके यशस् शब्दः सकारन्तः नपुंसकलिङ्गी।
- वीरवत्तमम्- वीरशब्दस्य मतुप्प्रत्यये तमप्प्रत्यये च द्वितीयैकवचने वीरवत्तमम् इति रूपम्।

- अश्वनत्- अश्-धातोः लोटि प्रथमपुरुषैकवचने अश्वनत् इति रूपम्।

अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि।

स इद्देवेषु गच्छति॥४॥

पदपाठः - अग्ने। यम्। यज्ञम्। अध्वरम्। विश्वतः। परिऽभूः। असि। सः। इत्। देवेषु।

गच्छति॥४॥

अन्वयः - अग्ने! यम् अध्वरं यज्ञं विश्वतः परिभूः असि सः इत् देवेषु गच्छति।

व्याख्या- हे अग्ने त्वं यं यज्ञं विश्वतः सर्वासु दिक्षु परीभूः परितः प्राप्तवान् असि सः इत् स एव यज्ञो देवेषु तृप्तिं प्रणेतुं स्वर्गे गच्छति। प्राच्यादिचतुर्दिगन्तेषु आहवनीयमार्जालीयगार्हपत्याग्नीध्रीयस्थानेषु अग्निरस्ति। परिशब्देन होत्रीयादिधिष्ण्यव्याप्तिर्विवक्षिता। कीदृशं यज्ञम्? अध्वरं हिंसारहितम्। न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति।

टिप्पणी - न विद्यते ध्वरः हिंसा अस्य इति अध्वरः। ध्वरणं ध्वरो हिंसा यस्मिन्नास्ति सः अध्वरः। कुतः हिंसा नास्ति। यज्ञे हि सर्वस्य अनुग्रहः भवति न तु हिंसा। परन्तु ओषधीनां पशूनां वृक्षानां पक्षिणां च हिंसा दृश्यते। तथापि हिंसारहितः इति कथमुच्यते। तत्र शिष्टमतम् -

ओषध्यः पशवो वृक्षास्तीर्यञ्चः पक्षिणस्तथा।

यज्ञार्थं मिथुनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः।। इति

अर्थात् वनस्पतयः पशवः वृक्षाः तिर्यग्योनिस्थाः पक्षिणः च यदि यज्ञे हिंसिताः तथापि तेषाम् सद्गतिः भवति। हीनलोकप्राप्तिः न भवति। उच्छ्रितिं ते प्राप्नुवन्ति। इत् शब्दः एवर्थे। स इद् देवेषु गच्छति - स एव देवेषु गच्छति इत्यर्थः। अर्थात् अग्निना सर्वतः रक्षितः यज्ञः एव देवेषु गच्छति। देवाः तमेव यज्ञम् परिगृह्णन्ति नान्यम्। अग्निना सर्वतः रक्षितं यज्ञम् एव देवाः स्वीकुर्वन्ति इत्यर्थः।

सरलार्थः- अस्मिन् मन्त्रे अग्निं प्रति उच्यते यत् हे अग्ने त्वं यथा हिंसारहितं यज्ञं परितः व्याप्नोषि तेन अवश्यं यज्ञः देवान् प्रति गच्छति।

व्याकरणम् -

- विश्वतः- विश्वशब्दस्य तसिल्प्रत्यये विश्वतः इति रूपम्।
- परिभूः- परिपूर्वकात् भूधातोः क्विप्प्रत्यये परिभूः इति रूपम्।
- असि- अस्-धातोः लटि मध्यमपुरुषैकवचने असि इति रूपम्।
- गच्छति- गम्-धातोः लटि प्रथमपुरुषैकवचने गच्छति इति रूपम्।

पाठगतप्रश्नाः

१. अग्निः कैः स्तुत्यः।
२. डकारस्य ळकारः कदा भवति।
३. पूर्वेभिः इति रूपं क्व साधु।
४. कीदृशम् अग्निं होता ईडे।
५. वक्षति इति रूपं कस्मिन् कस्मिन् लकारे सम्भवति।
६. दिवशब्दस्य सप्तम्येकवचने किं रूपं भवति।
७. यजमानः कीदृशं रयिं प्राप्नोति।
८. अश्नवत् इति रूपं कस्य धातोः कस्मिन् लकारे च विद्यते।
९. देवाँ इति रूपं कथं स्यात्।
१०. धने सति के सम्पद्यन्ते।
११. वीरवत्तमम् इति रूपं कथं सिद्धम्।
१२. पोषम् इति रूपं कथं सिद्धम्।
१३. परिभूः इति रूपं कथं सिद्धम्।
१४. ईड्यः इत्यस्य कः अर्थः।
१५. अश्नवत् इत्यस्य कः अर्थः।
१६. यशसम् इति रूपं कथं सिद्धम्।
१७. ईडे इत्यत्र कः धातुः।

१५.१.२) इदानीं मूलपाठम् अवगच्छाम।

अ॒ग्निर्होता॑ क॒विक्र॑तुः स॒त्यश्चि॒त्रश्र॑वस्तमः।
दे॒वो दे॒वेभि॒राग॑मत्॥५॥

पदपाठः - अ॒ग्निः। होता॑। क॒विऽक्र॑तुः। स॒त्यः। चि॒त्रश्र॑वःऽतमः। दे॒वः। दे॒वेभिः॑। आ। ग॒म॒त्॥५॥

अन्वयः - होता कविक्रतुः सत्यः चित्रश्रवस्तमः अग्निः देवः देवेभिः आ गमत्।

व्याख्या- अयम् अग्निः देवः अन्यैर्देवैर्हविर्भोजिभिः सह आ गमत् अस्मिन् यज्ञे समागच्छतु। कीदृशोऽग्निः। होता होमनिष्पादकः। कविक्रतुः। कविशब्दोऽत्र क्रान्तवचनो न तु मेधाविनाम। क्रतुः

प्रज्ञानस्य कर्मणो वा नाम। ततः क्रान्तप्रज्ञः क्रान्तकर्मा वा। सत्यः अनृतरहितः फलमवश्यं प्रयच्छतीत्यर्थः। चित्रश्रवस्तमः। श्रूयते इति श्रवः कीर्तिः। अतिशयेन विविधकीर्तियुक्तः॥

टिप्पणी - अयम् अग्निः देवानाम् होता। कविक्रतुः - क्रान्तं गतं सर्वत्र अप्रतिहतं क्रतुः प्रज्ञानं कर्म वा यस्य स कविक्रतुः। सत्यः अभिसम्पादकः यथाभिलषितफलदः इति यावत्। चायृ पूजानिशामनयोः इति धातुतः चित्रशब्दः व्युत्पन्नः इति स्कन्दस्वामी वदति। चित्र चित्रीकरणे इति अपरः धातुः अस्ति। ततः अपि चित्रशब्दः भवति। अयमेव चित्रशब्दः लोके प्रचलितः अस्ति। तस्य अर्थः विचित्र इति। अर्थात् विविधः, बहुप्रकारकः इति। श्रवः इति अन्नस्य नाम, धनस्य नाम अपि वर्तते। तस्य कीर्तिः इत्यपि अर्थः अस्ति। तमप्-प्रत्ययेन अतिशयः गम्यते। अतः चित्रश्रवस्तम इत्यस्य एकाधिकाः अर्था भवन्ति। तथाहि अतिशयेन पूज्यं विचित्रं विविधं वा अन्नं यस्य स चित्रश्रवस्तमः। अतिशयेन पूज्यं विचित्रं विविधं वा धनं यस्य स चित्रश्रवस्तमः। अतिशयेन पूज्या विचित्रा विविधा वा कीर्तिः यस्य स चित्रश्रवस्तमः। इति इमे अर्थाः सम्भवन्ति।

सरलार्थः- अग्निः यज्ञे देवताः आह्वयति। स च उत्कृष्टबुद्धिसम्पन्नः सत्यशीलः कीर्तिमान् च अस्ति। एवं यः अग्निः स देवताभिः सह यज्ञम् आगच्छतु।

व्याकरणम् -

- कविक्रतुः- कविः क्रतुः यस्य सः, बहुव्रीहिसमासः। प्रथमैकवचने रूपमिदम्।
- चित्रश्रवस्तमः- चित्रं श्रवः यस्य सः चित्रश्रवाः अतिशायी चित्रश्रवाः इति चित्रश्रवस्तमः, बहुव्रीहिसमासः। चित्रश्रवस्-शब्दात् तमप्प्रत्यये प्रथमैकवचने चित्रश्रवस्तमः इति रूपम्।
- देवेभिः- देवशब्दस्य तृतीयाबहुवचने वैदिकं रूपमिदम्। लौकिके तु देवैः इति रूपम्।
- गमत्- गम्-धातोः लेटि प्रथमपुरुषैकवचने गमत् इति रूपम्। सायणाचार्यमतानुसारेण गम्-धातोः लोटि प्रथमपुरुषैकवचने वैदिकं रूपमिदम्।

यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि।
तवेत्तत्सत्यमङ्गिरः॥६॥

पदपाठः - यत्। अङ्ग। दाशुषे। त्वम्। अग्ने। भद्रम्। करिष्यसि। तव। इत्। तत्। सत्यम्। अङ्गिरः॥६॥

अन्वयः - अङ्ग अग्ने! त्वं दाशुषे यत् भद्रं करिष्यसि, अङ्गिरः! तत् तव इत् सत्यम्।

व्याख्या- अङ्ग इत्यभिमुखीकरणार्थो निपातः। अङ्ग अग्ने! हे अग्ने त्वं दाशुषे हविर्दत्तवते यजमानाय तत्प्रीत्यर्थं यत् भद्रं वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि तत् भद्रं तव इत् तवैव। सुखहेतुरिति शेषः। हे अङ्गिरः! अग्ने एतच्च सत्यं, न त्वत्र विसंवादोऽस्ति। यजमानस्य वित्तादिसंपत्तौ सत्याम् उत्तरक्रत्वनुष्ठानेन अग्नेरेव सुखं भवति।

टिप्पणी - अङ्ग इति निपातस्य पादपूरणार्थे प्रयोगो भवति। क्षिप्रार्थे अपि प्रयोगः भवति। तदा क्षिप्रं शीघ्रं दाशुषे इति अन्वयः स्यात्। दाशृ दाने इति धातोः क्वसुप्रत्यययोगेन दाश्वस् शब्दः भवति। तस्य चतुर्थी दाशुषे इति। दात्रे इत्यर्थः। प्रकरणाद् अत्र हर्विदानकर्त्रे इति अर्थः भवति। भद् कल्याणे सुखे च धातोः रक्-प्रत्यययोगेन भद्रशब्दः निष्पद्यते। कल्याणम् इति तस्य सामान्यार्थः। कः कदा किं स्वस्य कल्याणं चिन्तयति इति देशकालपात्रभेदेन भिद्यते। अतः अत्र प्रकरणे यजमानः पशु-गृह-प्रजा-वित्तादिकम् कल्याणं मनुते चेत् पश्वादिकम् अत्र कल्याणम्। तदेव तस्य इष्टम्। अतः सायाणाचार्यः तथैव व्याख्याति। वस्तुतः सुखमेव ना वाञ्छति। अतः सुखमेव कल्याणम्। तथापि सुखसाधनमपि अपि कल्याणं कथ्यते। अतः यस्य लाभेन जनः सुखम् अनुभवति तत् कल्याणम् भद्रम्। तच्च प्रसङ्गभेदेन भिन्नं भवितुमर्हति। यास्काचार्यस्तु - भजनीयम्। भूतानाम् अभिद्रवणीयम्। भवद् रमयति। भजनवद्। इत्यादीन् अर्थान् वदति। इत् शब्दः एवर्थे वर्तते। तवेत् तत् इत्यस्य तव एव तद् इत्यर्थो लभ्यते। हे अग्ने त्वं भद्रं करिष्यसि इत्यत्र कृधातोः दानमर्थः गृह्यते। तेन हे अग्ने त्वं भद्रं दास्यसि इत्यर्थो लभ्यते। अङ्गिरस् शब्दः सकारान्तः पुंसि। अङ्गिराः नाम ऋषिः। तस्य उत्पत्तिकारणम् अग्निः इति स्कन्दस्वामी मनुते। कथं तर्हि अग्ने इति अङ्गिरः इति च सम्बोधने। अभेदबोधः खलु स्यात्। तत्रोच्यते कार्यशब्देन कारणस्य अभिधानम्। अर्थात् अङ्गिरः इत्यनेन अङ्गरसः कारणम् अग्निः बोध्यः। शरीरस्य अवयवः अङ्गं कथ्यते। शरीरम् अङ्गि कथ्यते। अङ्गिनः शरिरस्य स्थितिहेतुः शरीरे अशितात् पीताद् रसः जायते। भुक्तात् पीताद् वा पदार्थात् शरीरे रससृष्टिः अग्निवशाद् भवति। अतः शरीरे रसस्य कर्ता अग्निः अङ्गिरस् इति कथ्यते। इत्थं जठराग्निः अङ्गिराः भवति। रसाश्च लोहित-मांस-स्नायु-अस्थि-मज्जा-शुक्राः। भुक्तस्य एतद्रसरूपेण परिणामम् अग्निः करोति।

सरलार्थः- अत्र मन्त्रे अग्निं प्रति उच्यते यत् हे अग्ने अङ्गिरो वा त्वं हविदानकारिणां यजमानानां कृते यत् कल्याणं करोषि तत् वस्तुतः तवैव सुखसाधनम् अस्ति।

व्याकरणम् -

- अङ्ग- आकृष्टार्थकः सम्बोधनात्मकः निपातः।
- दाशुषे- दाशृ-धातोः क्वसुप्रत्यये चतुर्थ्येकवचने दाशुषे इति रूपम्।

उप॑ त्वाग्ने दि॒वेदि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम्।
नमो॒ भर॑न्त॒ एम॑सि॥७॥

पदपाठः- उप॑। त्वा॒। अ॒ग्ने॒। दि॒वेऽदि॑वे। दोषा॑ऽवस्तः। धि॒या। व॒यम्। नमः॑। भर॑न्तः। आ। इ॒म॒सि॒॥७॥

अन्वयः- दोषावस्तः अग्ने वयं दिवेदिवे धिया नमः भरन्तः त्वा उप आ इमसि।

व्याख्या- हे अग्ने वयम् अनुष्ठातारः दिवेदिवे प्रतिदिनं दोषावस्तः रात्रौ अहनि च धिया बुद्ध्या नमः भरन्तः नमस्कारं सम्पादयन्तः उप समीपे त्वा एमसि त्वाम् आगच्छामः।

टिप्पणी - लौकिकसंस्कृते धातोः अव्यवहितपूर्वम् उपसर्गः प्रयुज्यते। वेदे धातूपसर्गयोः मध्ये व्यवधानं सम्भवति। क्वचिच्च धातोः उत्तरम् अपि उपसर्गप्रयोगः भवति। ते (गत्युपसर्गसंज्ञकाः) प्राग् धातोः। छन्दसि परेऽपि। व्यवहिताश्च। इति त्रिभिः सूत्रैः पाणिनिः इदं प्रतिपादितवान् अष्टाध्याय्याम्। अतः अस्मिन् मन्त्रे उप इति उपसर्गस्य एमसि इति क्रियापदेन सह अन्वयः भवति। समीपम् आगच्छसि इति तदर्थः। दोषावस्तः - वस आच्छादने इति धातुः। दोषा इत्यस्य रात्रिरर्थः। रात्रौ स्वेन ज्योतिषा तमसम् आच्छादयति स दोषावस्ता, ऋकारान्तः शब्दः। तस्य सम्बोधने रूपम् दोषावस्तः। नम्-धातोः असुन्-प्रत्यययोगेन नमस् इति अव्ययम् निष्पद्यते। तत् नपुंसकलिङ्गि गण्यते। स्तुतिः नमस्कारः वा तदर्थः। भृधातोः शतृप्रत्यययोगेन भरत् इति प्रातिपदिकम् लभ्यते। तस्य पुंसि प्रथमाबहुवचनम् भरन्तः इति। नमः भरन्तः इति अन्वयः। नमः अत्र कर्मरूपेण ग्राह्यम्। अर्थात् नमस्कारम् सम्पादयन्तः कुर्वन्तः इति। हे अग्ने प्रतिदिनम् यथा अस्माकं प्रज्ञा तथा नमस्कारं स्तुतिं वा कुर्वन्तः वयं तव समीपम् आगच्छामः इति।

सरलार्थः- अस्मिन् मन्त्रे यज्ञकारिणः अग्निं प्रति कथयति यत् वयं दिवा रात्रौ च बुद्धियुक्ताः भवन्तः प्रणमन्तश्च तव समीपम् आगच्छामः।

व्याकरणम् -

- भरन्तः- भृधातोः शतृप्रत्यये प्रथमाबहुवचने भरन्तः इति रूपम्।
- इमसि- इधातोः लटि उत्तमपुरुषबहुवचने इमसि इति रूपम्। वेदे कदाचित् इदन्तो मसि इति सूत्रेण मस्य स्थाने मसि इत्यादेशः भवति।

राज॑न्तमध्व॒राणां॑ गो॒पामृ॒तस्य॒ दीदि॑विम्।
वर्ध॑मानं॒ स्वे दमे॑॥८॥

पदपाठः - राज॑न्तम्। अ॒ध्व॒राणा॑म्। गो॒पाम्। ऋ॒तस्य॑। दीदि॑विम्। वर्ध॑मानम्। स्वे। दमे॑॥८॥

अन्वयः - राजन्तम् अध्वराणां गोपाम् ऋतस्य दीदिविं स्वे दमे वर्धमानम्।

व्याख्या- पूर्वमन्त्रे त्वाम् उपैम इत्यग्निम् उद्दिश्य उक्तम्। कीदृशं त्वाम्। राजन्तं दीप्यमानम्। अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां गोपां रक्षकम् ऋतस्य सत्यस्य अवश्यंभाविनः कर्मफलस्य दीदिविं पौनःपुन्येन भृशं वा द्योतकम्। आहुत्याधारम् अग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्मफलं स्मर्यते। स्वे दमे स्वकीयगृहे यज्ञशालायां हविर्भिः वर्धमानम्॥

टिप्पणी - पूर्वमन्त्रे उक्तं यत् त्वाम् अग्निम् आगच्छामः इति। कीदृशं त्वाम्। राजन्तम्। राजृ दीप्तौ इति धातोः शतृप्रत्यययोगेन राजत् इति प्रातिपदिकं लभ्यते। तस्य द्वितीयैकवचने रूपम् राजन्तम् इति। प्रकाशमानम् इत्यर्थः। राजृ ऐश्वर्यकर्मा इति स्कन्दस्वामी। तदा राजत् इत्यस्य ईशान शासनकर्ता इत्यर्थः। कस्य शासनम् अध्वराणाम् यज्ञानाम् इति। गोपाम् - गां पाति इति गोपा। तम्। ऋतम् - ऋ गतौ इति धातोः क्तप्रत्यययोगेन ऋतशब्दः निष्पद्यते। ऋतशब्दस्य नैके अर्थाः वेदे एव परिलक्ष्यन्ते। सायणाचार्यमतेन कर्मफलम् तदर्थो भवति। स्कन्दस्वामिमतेन तदर्थो हि यज्ञः प्रकृते मन्त्रे। वेङ्कटमाधवमतेन तदर्थः सत्यम् इति। वेदे अस्य नैके अर्थाः। तत्र प्रथमोऽर्थः - ऋग्वेदे ऋतशब्दस्यर्थः प्रकृतिः इत्यपि बाहुल्येन लभ्यते। द्वितीयोऽर्थः - जगति सूर्य-चन्द्र-पृथिवी-नक्षत्र-ऋतु-दिन-रात्रीत्यादयः सर्वेऽपि विशिष्टं नियमम् अवलम्ब्य प्रवर्तन्ते। अयं शाश्वतः नियमः। अस्य नियमस्य उल्लङ्घनं न कुर्वन्ति। अयं नियम एव ऋतम्। अतः ऋतम् जगत् शास्ति। जगतः शानकम् ऋतम्। जगतः परिचालकः कश्चित् शाश्वतः नियमः ऋतम्। तृतीयोऽर्थः - यज्ञानाम् अनुष्ठाने देवानाम् आह्वानम् हविर्दानम् देवपूजा इत्यादीनाम् कश्चित् स्थिरः क्रमः दृश्यते। अयमेको नियम एव। अयं नियम ऋतम्। यज्ञकर्मणां नियमितता ऋतम्। चतुर्थोऽर्थः - यज्ञानां चालनम् ऋतेन भवतीति उक्तमेव। क्रमशः ऋतशब्दः यज्ञार्थे अपि प्रयुज्यते। ऋतं यज्ञः। पञ्चमोऽर्थः - यज्ञानुष्ठाने यजमानस्य ऋत्विजाम् च आचरणस्य नियमः हि व्रतम् कथ्यते। ऋतशब्दः ईदृशनैतिकव्रतार्थेऽपि दृश्यते।

सरलार्थः- ननु कीदृशस्य अग्नेः समीपं यज्ञकारिणः यान्ति। तदेव अस्मिन् मन्त्रे उच्यते यत् अयम् अग्निः दीप्तियुक्तः, यज्ञानां रक्षकः, कर्मफलानां पुनः पुनः द्योतकः स्मारकः, यज्ञे स्वस्थाने यज्ञगृहे वर्धमानश्च। ईदृशस्य अग्नेः समीपं यज्ञकारिणः यन्ति।

व्याकरणम् -

- राजन्तम्- राज्-धातोः शतृप्रत्यये द्वितीयैकवचने राजन्तम् इति रूपम्।
- दीदिविम्- दिव्-धातोः क्विन्प्रत्यये द्वित्वे द्वितीयैकवचने दीदिविम् इति रूपम्।
- वर्धमानम्- वृध्-धातोः शानच्प्रत्यये द्वितीयैकवचने वर्धमानम् इति रूपम्।

स नः॑ पि॒तेव॑ सू॒नवेऽग्ने॑ सूपाय॒नो भ॑व।
सच॑स्वा नः स्व॒स्तये॑॥९॥

पदपाठः - सः। नः॒। पि॒ताऽइ॑व। सू॒नवे॑। अग्ने॑। सु॒ऽउ॒पा॒य॒नः। भ॒व॒। सच॑स्व। नः॒। स्व॒स्तये॑॥९॥

अन्वयः- अग्ने ! सः (त्वं) सूनवे पिता इव नः सूपायनः भव। स्वस्तये नः सचस्व।

व्याख्या- हे अग्ने सः त्वं नः अस्मदर्थं सूपायनः शोभनप्राप्तियुक्तः भव। तथा नः अस्माकं स्वस्तये विनाशराहित्यार्थं सचस्व समवेतो भव। तत्रोभयत्र दृष्टान्तः। यथा सूनवे पुत्राय पिता सुप्रापः प्रायेण समवेतो भवति, तद्वत्।

टिप्पणी - सूपायनः - सु+उप+इण् गतौ इति धातोः ल्युट्-प्रत्यययोगेन सूपायनशब्दः निष्पद्यते। शोभनम् उपायनम् अस्य असौ सूपायनः। उपैति इति समीपं गच्छति। सुखेन समीपं गन्तुं शक्यम् तादृशः त्वं भव हे अग्ने। सूपगमः सुखोपसर्पो भव। सु+अस् भुवि इति धातोः क्तिन्-प्रत्यययोगेन स्वस्ति इति शब्दः निष्पद्यते। बहुत्र अस्यार्थः संततिपरम्पपरायाः उच्छेदस्य रहित्यम् इति दृश्यते। अविनाशः इत्यर्थः सायणस्य। सच् समवाये इति धातोः आत्मनेपदे लोटि थासि रूपम् सचस्व इति। समवेतो भव, अस्मान् सेवस्व। अर्थात् अस्माकं विनाशराहित्याय प्रवर्तस्व इत्युक्तं भवति।

सरलार्थः- अस्मिन् मन्त्रे अग्नेः अनायासेन प्राप्त्यर्थं प्रार्थ्यते। अत्र अग्निं प्रति उच्यते हे अग्ने पिता यथा पुत्रस्य समीपे अनायासेन प्राप्तिविषयः भवति तथैव त्वमपि अस्माकं कल्याणाय अनायासेन प्राप्तिविषयः भव।

व्याकरणम्-

- सूपायनः- सुपूर्वकात् उपपूर्वकात् इ-धातोः युच्प्रत्यये सूपायनः इति रूपम्। सुखेन उपायनं यस्य सः सूपायनः।
- भव- भू-धातोः लोटि मध्यमपुरुषैकवचने भव इति रूपम्।
- स्वस्तये- सुपूर्वकात् अस्-धातोः क्तिन्प्रत्यये चतुर्थ्येकवचने स्वस्तये इति रूपम्। लौकिके तु स्वस्ति इति अव्ययपदम्।
- सचस्व- सच्-धातोः आत्मनेपदे लोटि मध्यमपुरुषैकवचने सचस्व इति रूपम्।

पाठगतप्रश्नाः

१८. कविक्रतुः इत्यस्य कः अर्थः।

१९. कीदृशः अग्निः देवैः सह समागच्छतु।

२०. गमत् इति रूपं कथं सिद्ध्येत्।

२१. अङ्ग- इति कीदृशः निपातः।

२२. अङ्गिरः इत्युक्त्वा कस्य सम्बोधनं क्रियते।

२३. इमसि इत्यत्र कः धातुः।

२४. चित्रश्रवस्तमः इत्यस्य विग्रहं समासं च लिखत।

२५. दाशुषे इत्यस्य प्रकृतिं प्रत्ययं च लिखत।

२६. सूपायनः इत्यत्र कः धातुः।

२७. दोषावस्तः इत्यस्य कः अर्थः।

२८. सचस्व इति रूपं कथं सिद्ध्येत्।

२९. दीदिविम् इति रूपं कथं सिद्ध्येत्।

३०. अध्वराणाम् इत्यस्य कः अर्थः।

३१. भरन्तः इति रूपं कथं सिद्ध्येत्।

३२. श्रवः इत्यस्य कः अर्थः।

१५.२) अग्निस्वरूपम्

सर्वासु वैदिकदेवतासु अग्निरेव पवित्रतमा देवता। ऋग्वेदे केवलस्य अग्नेः द्विशतसूक्तेषु स्तुतिः कृता दृश्यते। एतद् विहाय अन्येष्वपि सूक्तेषु अन्याभिः देवताभिः सह अग्निरपि स्तूयते। यद्यपि गुरुत्वदृष्ट्या इन्द्रात् परमेव अग्नेः स्थानं तथापि यज्ञप्राधान्यात् वेदस्य प्रत्येकमण्डलारम्भे स सम्बोधनविषयताम् एति।

वेदे द्यावापृथिवी इत्येकं बहुचर्चितं देवतायुगलम्। अनयोः पुत्रत्वेन परिकल्पितः अग्निः पृथिव्याम् अवतिष्ठते। एत एव वैदिकशब्दानां व्युत्पत्तिप्रदर्शने प्रवृत्तः निरुक्तकारः सर्वप्रथमम् अग्निं व्याख्यातुकाम आह – "अग्निं पृथिवीस्थानस्थं प्रथमं व्याख्यास्यामः" इति। अनेन पृथिवीस्थिता इयं देवता देवतानां प्रथमा इति सुस्पष्टं भासते। वेदसंहितासु सर्वपुरातनत्वेन ऐतिहासिकैः समर्थिता अग्निसूक्तादेव आरभते। तथाहि तत्राम्नातम् – "अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। " इति। गीतिप्रधानस्य सामवेदस्यापि अग्न आयाहि वीतये इति अग्नेः आह्वानपर आरम्भो लभ्यते। "अग्निर्वै प्रथमो देवतानाम्", "अग्निर्वै देवानामवमः", इत्यादीनि ब्राह्मणवाक्यानि देवतासु अग्नेः प्राथम्यं निःसन्देहं प्रकटयन्ति।

वैदिकदृशा यज्ञ एव श्रेष्ठतमं वैदिकं कर्म। यद्यपि परवर्तिनि काले यज्ञशब्दो व्यापकार्थपरः प्रयुज्यमानो दृश्यते तथापि यज्ञ इत्युच्यमाने सति अग्निहोत्ररूपार्थः झटिति गम्यते। अयमेव अग्निः होमनिष्पादकः क्रान्तप्रज्ञः अनृतरहितः विविधकीर्तियुक्तः इति कीर्तितः। तथाहि आम्नायते – "अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः"इति। अस्मात् अग्नेः सकाशात् यजमानः सर्वम् अभिलषितम् आसादयति। सर्वोपरि स यजमानस्य पिता भ्राता आत्मीयश्च भवति। तदाम्नातम् ऋक्संहितायाम् – "अग्निं मन्ये पितरमग्निमपिमग्निं भ्रातरं सदमित् सस्वायम् ....”इति।

निरुक्तकारस्य यास्कस्य मते वेदेषु अग्निरेव एकः देवः। स एव इन्द्रवरुणादिनाम्ना बहुभिः प्रकारैः वर्ण्यते। तथाहि आम्नातं – "त्वमग्न इन्द्रो वृषभः .. त्वं विष्णुः ... त्वमग्ने राजा वरुणो धृतव्रतस्त्वं मित्रो भवसि" इति। ऐतरेयब्राह्मणे अग्निः सर्वाः देवताः इति मन्त्रांशेन अग्नेः सर्वदेवमयत्वं प्रतिपादितम्।

अग्नेः सर्वज्ञत्वमपि कीर्तितं यतः स यज्ञविषयकं सर्वं वेत्ति। ततो जातवेदा इति तस्य संज्ञा। स तदुपासकेषु वररूपेण पुत्रवित्तादिकं वर्षति। तथाहि आम्नातम् – "अग्निना रयिमश्नवत् ..” इति। प्रसङ्गे अस्मिन् "आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात्”इति पौराणिकी भणितिरपि अनुसन्धेया। अग्नेः

दैत्यविनाशकीर्तिरपि क्वचित् कीर्त्यते। म्याक्डोनल्महोदयस्य मतानुसारम् इन्द-इराणीयमानवानां मध्ये बहुपूर्वकालतः अग्निपूजायाः प्रचलनम् आसीत्। तन्मते इतालीया ग्रीसदेशीयाश्च अग्नौ एव विविधान् देवान् उद्दिश्य होममकुर्वन्।

१५.३) वेदे अग्निचरितम्

यागो हि आर्याणाम् ऐहिकामुष्मिकाभ्युदयसाधनम् अपूर्वमुत्पादयन् एकमेव धर्मसाधनमिति परिगण्यते। यागे हि अभीष्टदेवमुद्दिश्य हविस्त्यागेन तदानुकूल्याद् इष्टप्राप्तिर्घटते यजमानानाम्। स च यागः अग्निसाध्यः। अग्निर्यदि यजमानेन हुतं हव्यं तत्तद्देवान् न प्रापयेत् तदा कुतोऽभीष्टप्राप्तिः? अतएव वैदिकमन्त्रेषु इन्द्रात् परमेव अग्नेरभ्यर्हितत्वं प्रकटयन्ति अग्निदेवताका द्विशताधिकस्तोत्रनिबद्धा मन्त्राः।

अग्नेर्हि केशास्तस्य ज्वालाः। दन्तास्तस्य हिरन्मयाः। तस्य जिह्वाम् आश्रित्यैव देवा हविर्भुञ्जते। तदुक्तम् 'अग्निर्वै देवानां मुखम्' 'अग्निर्मुखं प्रथमो देवतानामि'ति। अग्निः बहुत्रैव विविधैः पशुभिः सह तुलितः। क्वचित् स तीक्ष्णशृङ्गधारी वृषभ इव वर्णितः। उत्पत्तिसमये स गोवत्स इव भवति। यदा सः अरणिप्रघर्षनाद् उत्पाद्यते तदा स देवानां वाहकस्तथा देवान् प्रति दत्तानां हविषां वाहकः अश्व इव यागरूपेण रथेन सह यजमानैर्युज्यते इत्यपि क्वचिद् वर्णितम्। स हि दिव्यो विहङ्गः। स च नभसः श्येनः। काष्ठं घृतं च तस्य भोज्यम्। गलितं घृतं तस्य प्रियम्। स दिवसस्य त्रिभिः हविर्भिः उपास्यते। स तस्य ज्वालारूपेण चमसेन देवान् हविः प्राशयति।

स सूर्य इव तपति। जीमूतगर्भाया दामिन्या दीप्तिरिव तस्य दीप्तिः। स न केवलं दिवा नक्तमपि तमिस्रामपसार्य सर्वं प्रकाशयति। स कृष्णेन वर्त्मना उपसर्पन् अरण्यानीमाक्रम्य यदा निःशेषं दहति, तदा स नापितवत् क्षुरपत्रेण पृथिव्याः श्मश्रुजातं मुन्तयति। तस्य ज्वालाः गर्जदुर्मय इव रावश्च वज्रानिर्घोष इव प्रतीयते। तस्य लोहिताभधूमाः स्तम्भाकारं परिगृह्य आकाशं स्पृशन्तः नभस आलम्बनतया विराजन्ते। धूमकेतुरिति तस्याभिधान्तरम्। स दीप्तिमद्भिरभयं लोहिताभ्याम् अश्वाभ्यां वाहितं स्यन्दनमेकं समारुह्य सञ्चरति। स सारथिरिव यागरथं चालयन् अभीष्टान् देवान् यागस्थानमावहति। 'आ विश्वेभिः सरथं याहि देवैः' इति 'स्वयं यजस्व दिवि देव देवान्' इति च प्रमाणम् (मण्डलादिषु आग्नेयमैन्द्रात्)। स द्यावापृथिव्योः पुत्रः। क्वचिद् अपां युत इत्यपि कीत्र्यते। देवा आर्याणां मानवानां मध्ये तेषां दीपकतया अंग्नि स्थापयामासुः। इन्द्रो हि अग्नेः सहोदर इत्युच्यते। अत एव अग्निना सह तस्य सम्बन्धो देवान्तरापेक्षया अधिकं दृढः।

तस्योत्पत्तिविषये विविधं पौराणिकं तथ्यं प्राप्यते। अरणिद्वयमन्थनेन उत्पाद्यमानस्य वह्नेः पितरौ हि अरणिद्वयम्। कथ्यते यत् जन्ममात्रमेव शिशुरग्निः तस्य पितरौ भक्षयति। अग्निप्रज्वालकस्य पुंसो दशहस्ताङ्गुलयो हि वह्नेः दश धातृमातरः। यस्माद् बलेनैव उत्पाद्यः स तस्मात् 'सहसः सूनुं बलपुत्रः' इति तस्याभिधान्तरम्। प्रतिदिनं प्रभाते यदा अग्निः प्रज्वाल्यते, तदा स युवा इवाभाति। न कोऽपि यष्टा अग्नेः ज्यायान् यतस्तेनैव प्रथमतो यागः सम्पादितः।

'न हि देवो न मत्र्यो / महस्तव क्रतुं परः। ' उपाख्यानान्तरेण अग्नेरुत्पत्तिविषयकमपरं तथ्यमिदं समर्थ्यते यत् अग्निः वृषभ इव अपामङ्के समुत्पन्नः। अत एव अपां नपादित्याख्यां धारयन् स वैदिकवाङ्मये पृथग् दैवतमिव पृथक् स्तुतिभिः संस्तुतः। अपरमिदं मतमुपन्यस्तं यदग्निं दिवि जातः। मातरिश्वान् इत्याख्यः कोऽपि देवः स्वर्गतोऽग्निं मर्त्यलोकमानयति। सूर्योऽपि अग्नेरन्यतमा मूर्तिरिति कीर्त्यते। एवमग्निस्त्रिधामूर्त्तिः सञ्जातः। तस्य त्रिधा द्युतयः त्रीणि शिरांसि त्रयो देहाः त्रीणि च स्थानानि।

'अग्ने त्री ते वाजिना त्री यधस्था / तिस्रस्ते जिह्वा ऋतजात पूर्वीः

तिस्र उ ते तन्वो देववाता / स्ताभिर्नः पाहि गिरो अप्रयुच्छन्।। '

यतो विश्वमिदं द्विधा विभक्तं द्यावापृथिवीभ्यां तस्मादुभयत्र जायमानोऽग्निः द्विजन्मा इत्युच्यते।

देवान्तरापेक्षया अग्निः अधिकतया मनुष्यजीवनं सम्बध्नाति। अग्निरेव केवला देवता या स्थूलेन चक्षुषा प्रत्यक्षा भवति नृणाम्। अत एव स पृथिवीस्थानदेवेषु अग्रतो गण्यते। स एव केवलं गृहपतिरित्युच्यते, उच्यते यत्, सोऽतिथिरूपेण यजमानानां गृहाद् गृहान्तरं व्रजति। स स्वयममरः सन् मरणधर्माणां गृहेषु आश्रयं स्वीकरोति। स क्वचित् तदुपसकानां पितेव, क्वचित् भ्रतेव क्वचिद् सुत इव वर्णितः। तदुक्तम्-

'अग्निं मन्ये पितरमग्निमापिमग्निं / भ्रतरं सदमित् सखायम्' इति। अपि चोक्तम् - 'स नः पितेव सूनवे / ऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये। ' स मनुष्यैर्दत्तं हविर्देवान् प्रापयति। तथा देवानपि यज्ञस्थलमावहति। अत एव स देवैः दूतत्वेन मनुष्यैश्च हविर्वाहकत्वेन नियोजितः। यतोऽग्नौ हि यागो निष्पाद्यते ततः स यज्ञस्य ऋत्विग्, विप्रः पुरोहित इत्यभिधीयते। एवं क्वचिद् अन्यत्र होता, अध्वर्युः, ब्रह्मण इत्यादिभिरभिधाभिः सोऽभिहितः। अत्र प्रसङ्गत उल्लेखमर्हति अयं मन्त्रः -

'अग्निमीळे पुरोहितं /यज्ञस्य देवमृत्विजम्। / होतारं रत्नधातमम्।। ' इति

अग्नेः सर्वज्ञत्वमपि कीर्त्तितम्, यतः स यज्ञ विषयकं सर्वं वेत्ति। ततो जातवेदा इति तस्य संज्ञा। स तदुपासकेषु वररूपेण पुत्रवित्तादिकं वर्षति। तथाहि आम्नातम् -

'अग्निना रयिमश्नवत्/ पोषमेव दिवेदिवे। / यशसं वीरवत्तमम्।। ' इति।

प्रसङ्गेऽस्मिन् 'आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनादि'ति पौराणिकी भणितिरपि अनुसन्धेया। अग्नेः दैत्यविनाशकीर्तिरपि क्वचित् कीर्त्यते। म्याक्डोनालमहोदयस्य मतानुसारम् इन्दो-इराणीयमानवानां मध्ये बहुपूर्वकालतः अग्निपूजायाः प्रचलनमासीत्। तन्मते इतालीया ग्रीसदेशीयाश्च अग्नौ इव विविधान् देवानुद्दिश्य होममकुर्वन्।

प्राच्यविदुषां मतानुसारमग्निरङ्गतेरिति विग्रहानुसारम् अग्-धातोः निप्रत्यये अग्निशब्दो निष्पाद्यते। अग्निः अङ्गति स्वकीयमङ्गं सन्नममानः प्रह्वीभवन् स्वयमेव काष्ठदाहे हविष्पाके च प्रेरयति इत्यर्थः। म्याक्डोनालमते तु अग्निरिति शब्दः 'एजा इल ..' इति ग्रीक्देवताया नाम्ना अस्य भाषाविज्ञानसमर्थितं सादृश्यं परिलक्ष्यते।

इग्निस् इति लातिनशब्देन संस्कृतस्य अग्निशब्दस्य ध्वनिगतम् अर्थगतञ्च साम्यं परं विस्मयमावहति। नैरुक्तमतानुसारं तु एतिधातुनिष्पन्नाद् अयनशब्दादकारम्, अनक्ति-धातोः ककारं,

नयतेश्च नीरिति आदाय ककारस्य गकारादेशं कृत्वा नीरित्यस्य ईकारस्य ह्रस्वादेशं विधाय अग्निशब्दो निष्पाद्यते प्रत्यक्षवृत्तिं परोक्षवृत्तिम् अतिपरोक्षवृत्तिं चारलम्ब्य इति शम्।

पाठसारः

अस्मिन् पाठे अग्निसूक्तस्य नव मन्त्राः सन्ति। तत्रादौ अग्निमीळे पुरोहितम्... इति मन्त्रः अग्निसूक्तस्य आदिममन्त्रः विद्यमानः। तत्र उक्तम् अग्निः एव यज्ञे सर्वान् देवान् आह्वयति। स एव यज्ञस्य पुरोहितः। ततः द्वितीये मन्त्रे उक्तं यत् अग्निः कैः स्तुत्यः। के तस्य स्तुतिं कुर्वन्ति। उक्तं प्राचीनैः पुरातनैः च ऋषिभिः स स्तुत्यः। ततः तृतीये मन्त्रे यजमानः अग्निना किं लभते। उक्तं- धनं लभते। तच्च प्रतिदिनं वर्धमानम्। एवं दानादिकर्मणा यजमानः यशश्च लभते। ततः चतुर्थे मन्त्रे अग्निं प्रति उच्यते यत् त्वं यथा हिंसारहितं यज्ञं परितः व्याप्नोषि तेन अवश्यं यज्ञः देवान् प्रति गच्छति। पञ्चमे मन्त्रे उच्यते कीदृशः अग्निः देवताभिः सह आगच्छति। उक्तं-स अग्निः उत्कृष्टबुद्धिसम्पन्नः सत्यशीलः कीर्तिमान्। ततः षष्ठे मन्त्रे अग्निं प्रति उच्यते यत् त्वं यत् कल्याणं करोषि तत् वस्तुतः तवैव कल्याणं भवति। ततः सप्तमे मन्त्रे अग्निं प्रति यज्ञकारिणां गमनम् उच्यते। ते अग्निं प्रति गन्तुम् इच्छन्ति। अधुना प्रश्नः भवितुम् अर्हति यत् कीदृशः अग्निः। अस्य उत्तरं ततः परस्मिन् मन्त्रे एव उच्यते यत् दीप्तियुक्तः, यज्ञानां रक्षकः, कर्मफलानां द्योतकः, यज्ञे स्वस्थाने वर्धमानश्च। ततः नवमे मन्त्रे अग्नेः सुप्राप्त्यर्थम् उच्यते। तत्र उपमया उच्यते यत् पिता यथा पुत्रस्य समीपे अनायासेन प्राप्तिविषयः भवति तथैव हे अग्ने त्वमपि भव। एवं प्रकारेण अग्नेः स्वरूपं माहात्म्यं च उक्ते।

पाठान्तप्रश्नाः

(अग्निसूक्ते)

१. अग्निस्वरूपं वर्णयत।

अग्निमीळे पुरोहितम्... इत्यादिमन्त्रं व्याख्यात।

अग्नः पूर्वेभि... इत्यादिमन्त्रं व्याख्यात।

अग्निना रयि... इत्यादिमन्त्रं व्याख्यात।

अग्ने यं यज्ञ... इत्यादिमन्त्रं व्याख्यात।

२. अग्निसूक्तस्य सारं लिखत।

अग्निर्होता कविक्रतुः... इत्यादिमन्त्रस्य व्याख्यात।

यदङ्गदाशुषे... इत्यादिमन्त्रस्य व्याख्यात।

उप त्वाग्ने... इत्यादिमन्त्रस्य व्याख्यात।

राजन्तमध्वराणाम्...... इत्यदिमन्त्रस्य व्याख्यात।

स नः पितेव... इत्यादिमन्त्रस्य व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

उत्तरपूगः-१ (अग्निसूक्ते)

१. प्राचीनैः नूतनैश्च ऋषिभिः।

२. अज्मध्यस्थस्य डकारस्य।

३. वेदे।

४. यज्ञस्य पुरोहितं, ऋत्विजं, रत्नधातमम्।

५. लृटि लेटि च।

६. दिवेदिवे।

७. पोषं यशसं वीरवत्तमम्।

८. अश्-धातोः।

९. देवशब्दस्य द्वितीयाबहुवचने रूपमिदम्। पदान्ते स्थितात् नकारात्पूर्वं आकारः किञ्च परं यः कोऽपि स्वरः तिष्ठति चेत् नकारस्य लोपः भवति। अपि तु पूर्ववर्णस्य अनुनासिकादेशः भवति।

१०. पुरुषाः।

११. वीरशब्दस्य मतुप्प्रत्यये तमप्प्रत्यये च द्वितीयैकवचने।

१२. पुष्-धातोः घञ्प्रत्यये द्वितीयैकवचने।

१३. परिपूर्वकात् भू-धातोः क्विप्प्रत्यये।

१४. स्तुत्यः।

१५. प्राप्नोति।

१६. यशश्शब्दस्य अच्प्रत्यये द्वितीयैकवचने।

१७. ईड्धातुः।

उत्तरपूगः-२ (अग्निसूक्ते)

१८. क्रान्तप्रज्ञः क्रान्तकर्मा वा।

१९. होता कविक्रतुः सत्यः चित्रश्रवस्तमः।

२०. गम्-धातोः लेटि प्रथमपुरुषैकवचने गमत् इति रूपम्। सायणाचार्यमतानुसारेण गम्-धातोः लोटि प्रथमपुरुषैकवचने वैदिकं रूपमिदम्।

२१. अभिमुखीकरणार्थो निपातः।

२२. अग्नेः।

२३. इधातुः।

२४. चित्रं श्रवः यस्य सः चित्रश्रवाः अतिशायी चित्रश्रवाः इति चित्रश्रवस्तमः, बहुव्रीहिसमासः।

२५. दाशृ-धातोः क्वसुप्रत्यये चतुर्थ्येकवचने दाशुषे इति रूपम्।

२६. इधातुः।

२७. रात्रावहनि च।

२८. सच्-धातोः आत्मनेपदे लोटि मध्यमपुरुषैकवचने।

२९. दिव्-धातोः क्विन्प्रत्यये द्वित्वे द्वितीयैकवचने।

३०. राक्षसकृतहिंसारहितानां यज्ञानाम्।

३१. भृ-धातोः शतृप्रत्यये प्रथमाबहुवचने।

३२. कीर्तिः।

॥इति पञ्चदशः पाठः॥